National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(46): 235-238
© 2023 NJHSR
www.sanskritarticle.com

**डॉ. लालसिंहपठानिया**
प्राचार्य: (प्र.),
सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

**Correspondence:**
**डॉ. लालसिंहपठानिया**
प्राचार्य: (प्र.),
सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

# वैदिकवाङ्मये पञ्चमहायज्ञानां विश्लेषणम्

**डॉ. लालसिंहपठानिया**

यज्ञशब्दस्य व्युत्पत्तिदृष्ट्या यज्ञस्य महत्त्वं समायाति समक्षं यत् यजनम् इन्द्रादिदेवानां पूजनं सत्कारभावनं यज्ञः। इज्यन्ते देवा अनेनेति यज्ञः। इज्यन्ते देवा अस्मिन्निति यज्ञः। इज्यते देवेभ्यः अस्मिन्निति यज्ञः। इज्यते असौ इति यज्ञः (विष्णुः), इज्यन्ते सम्पूजिताः तृप्तिमासाद्यन्ते देवा अत्रेति यज्ञः। आभिर्व्युत्पत्तिभिर्यज्ञस्य महत्त्वं ज्ञायते। एवमेव सङ्गतिकरणार्थं यज्ञस्य व्युत्पत्तिः क्रियते यजनं धर्मदेशजातिमर्यादारक्षणायैर्महापुरुषाणामेकीकरणं यज्ञः। इत्यन्ते सङ्गती क्रियन्ते विश्वकल्याणाय परिभ्रमणं कृत्वा महान्तो विद्वांसो वैदिकशिक्षणशिरोमणयो व्याख्यानरत्नाकरा निमन्त्र्यन्ते अस्मिन्निति यज्ञः। इज्यन्ते स्वकीयबन्धुबान्धवादयः प्रेमसम्मानभाजः सङ्गतिकरणाय आहूयन्ते प्रार्थ्यन्ते च येन कर्मणेति यज्ञः। एवं विविधाभिर्व्युत्पत्तिभिर्यज्ञस्य स्वरूपमाचार्यैः प्रतिपादितम् । यज्ञस्य लक्षणं प्रस्तोति मत्स्यपुराणकारः -

**देवानां द्रव्यहविषाम् ऋक्सामयजुषां तथा।**
**ऋत्विजां दक्षिणानां च संयोगो यज्ञ उच्यते॥**[1]

यज्ञस्य द्वौ भेदौ स्तः यज्ञो महायज्ञश्च। यत्र स्वस्य कृते ऐहिकपारलौकिककल्याणाय पुत्रेष्टिविष्णुयागादयः सम्पाद्यन्ते स यज्ञः। यत्र विश्वकल्याणार्थं कर्म क्रियते तद् महायज्ञस्य। महर्षिभारद्वाजेन उभयोर्लक्षणं प्रदिशन् निगदितम् - यज्ञः कर्मसु कौशलम्। समष्टिसम्बन्धान्महायज्ञः। श्रौतसूत्रेषु एवं वैदिकयज्ञेषु चतुर्दशयज्ञसङ्ख्या वर्तते सप्तपाकयज्ञाः सन्ति। ततः गृह्यसूत्रधर्मसूत्रयोः पञ्चमहायज्ञानां व्यवस्था प्राप्यते।

यज्ञेन यज्ञमजयन्त देवास्तानि धर्माणि प्रथमान्यासन्। अनेन मन्त्रेण साक्षान्निर्देशोऽस्माभिः प्राप्यते यत् सृष्ट्यादौ परमात्मना यज्ञेन यज्ञः सम्पादितः। तेन यज्ञेन सृष्टिर्निस्सरिता। अनया सिद्धान्तदृष्ट्या यज्ञरूपकर्मणा सृष्टिसञ्चालनं भवति। यज्ञस्य महत्त्वं प्रतिपादयन् महाभारतकारेण व्यासेन निगदितं यत् "यज्ञो वै श्रेष्ठतमं कर्म"। तात्पर्यमिदं यत् जीवनचर्यायां यत्किमपि कर्म क्रियते मनुजैः तत्सर्वं यज्ञ एव। अस्माकं शाश्वत्यां संस्कृतौ यज्ञानामपरिमितमहत्त्वं प्रतिपादितं वर्तते। आदौ ऋग्वेदो निर्दिशति "अयं यज्ञो भुवनस्य नाभिः"[2] अयमेवाभिप्रायः अथर्ववेदेऽपि प्रतिपादितः "अयं यज्ञो भुवनस्य नाभिः"[3] एवमेव यज्ञो जीवनस्य सञ्चालक उत्तमपिबहुधा एतस्मिन् सन्दर्भे अथर्ववेदे -

अपं यज्ञो गातुविद् नाथविद् प्रजाविद् ।[4] इयं समित् पृथिवी द्यौर्द्वितीया।[5] एष यज्ञानां विततो बहिष्ठः।[6]
यज्ञीमिमं वर्धयता गिरः।[7] तरांशि यज्ञा अभवन्।[8] यज्ञैरथर्वा प्रथमः पथस्तते।[9]

सर्वविधकल्याणकाङ्क्षुर्वेदसम्मतयज्ञमार्गमनुसरेदिति निर्देशो बहुधा प्राप्यते। वेदानामाविर्भावो यज्ञसम्पादनायैवेति पुराणानि वदन्ति। यथोक्तं विष्णुधर्मोत्तरपुराणे - वेदास्तु यज्ञार्थमभिप्रवृत्ताः। मनुनोक्तम् - दुदोहयज्ञसिद्ध्यर्थम् ।[10]

पद्मपुराणे यज्ञकर्मसम्पादनाय मानवोत्पत्तिर्विहिता इति ब्रह्मणा प्रतिपादितम् -

"यज्ञनिष्पत्तये सर्वमेतद् ब्रह्म् चकार ह ।
चातुर्वर्ण्यं महाभागयज्ञसाधनमुत्तमम् ।।[11]

पुरुषसूक्तस्य मन्त्रोऽयं निर्दिशति यत् सर्वादौ उत्पन्नेन भगवत्स्वरूपयज्ञेन इन्द्रप्रजापति-साध्यमन्त्रद्रष्टारो यज्ञं चक्रुः -

तं यज्ञं बर्हिषि प्रोक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये।।[12]

यज्ञस्य प्राथम्यमभिव्यनक्तिः शतपथब्राह्मणोऽपि -
अथैनमात्मनः प्रतिमामसृजत यद यज्ञम् तस्मादाहुः।
प्रजापतिर्यज्ञ इत्यात्मनो ह्येनं प्रतिमामसृजत॥[13]

अनेन क्रमेण यज्ञः भुवनस्य नाभिः कथितः। कालान्तरे यज्ञो वै विष्णुः, यज्ञो वै श्रेष्ठतमं कर्म" इत्यादिभिर्यज्ञस्य महत्त्वं प्रतिपादितम्। पुनः कर्ममीमांसाप्रवृत्तेन मानवदेहं स्वीकृत्य ऋषिऋण-देवऋण-पितृऋण-मिति त्रिविधऋणेभ्य आधमर्ण्यं प्राप्नोति। यथोक्तं श्रीमद्भागवते -
ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितृणां प्रभो।
यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन् पतेत्॥
अभिप्रायोऽयं यदनेन मन्त्रेण विविधऋणमुक्तिसाधनोपाया विहिता। त्रिविधऋणाधमर्ण्यं निर्दिशति तैत्तिरीयसंहिता यथा -
जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते
ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः॥[14]

शास्त्राणां विस्तारक्रमे यदा स्मृतय आगतास्तस्मिन्नेव काले मानवजीवनस्य सम्यग्व्यवहाराय विविधकर्मसंविधानं धर्मशास्त्रकारैः निर्धारितम्। तस्मिन्नेव क्रमे पञ्चमहायज्ञानामवतरणमपि जातम्। प्रायः सर्वे स्मृतिकाराः पञ्चमहायज्ञानामनिवार्यतां प्रस्तुतावन्ति। एतेषां पञ्चमहायज्ञानां जीवने आचरणं समाजोत्थानाय परस्परसहयोग-सामञ्जस्य विकासाय विविधपापकर्मविमोचनाय शास्त्रविहितदिनचर्या निर्धारिता।

वेदः प्रमाणमत्र एवमेव तरांशि यज्ञा अभवन् ।[15]

आत्मा यज्ञेन अल्पताम् ।[16]
आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पताम्।
चक्षुर्यज्ञेन कल्पतां श्रोत्रं यज्ञेन कल्पताम्।
पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्।[17]
अन्यत्रापि अयं मन्त्रांश प्राप्यते यजुर्वेदे -
आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां
श्रोत्रं यज्ञेन कल्पतां वाग्यज्ञेन कल्पतां मनो यज्ञेन कल्पतामात्मा
यज्ञेन कल्पतां ब्रह्मायज्ञेन कल्पतां ज्योतिर्यज्ञेन कल्पतां
स्वर्यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्।[18]

एवं यज्ञात्सर्वं प्रसिद्धयतीति वक्तुं शक्यते। एवं विधशास्त्रविहित-यज्ञकर्मविधानं सम्प्रयुज्य लोके सर्वं प्राप्य स्वर्गमाप्नोति । शास्त्रकारा लोके गृहस्था किं किं कुर्वन्त्विति निर्दिशन्ति। तस्मिन् यज्ञकर्मात्या-वश्यकमस्ति। तत्रापि सामान्यजीवनचर्यायां पञ्चमहायज्ञानाम-नुष्ठानमनिवार्यतया पालनीयमित्यादेशः। यथोक्तं मनुना -
वैवाहिकेऽग्नौ कुर्वीत गृह्यकार्यं यथाविधिः।
पञ्चयज्ञविधानं च पङ्क्तिः चान्वाहिकीं गृही।[19]

एवं गृहस्थेभ्यः पञ्चमहायज्ञानामनुष्ठानमपरिहार्यमिति निर्देशो गृहकर्मणि प्रवृत्तगृहस्थानां पञ्चविधकृतपापमुक्त्यर्थं पञ्चमहायज्ञनां विधानमत्र विहितम् । तत्र पञ्चपापकर्मस्थलं निर्दिशन् निगदति मनुः -

पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन्॥

अर्थात् गृहस्थस्य पञ्चपापकर्मस्थलानि सन्ति । चुल्ली (चूल्हा) पेषणी (जाँता) उपस्करः (झाडू) कण्डनी (ओखली-मुसल) कुम्भः, एते पञ्चा धाराः पापकर्मणाम् । एतैस्साद्धं आचरणं पापकर्म भवत्येव नास्त्यत्र काचिदपि विचिकित्सा कुत्रापि ।

एतेभ्यः क्रियमाणकर्मेभ्यो निवृत्त्यर्थं महर्षिभिः पञ्चमहायज्ञाः प्रकल्पिताः , यथा निर्देशः प्राप्यते -
तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः।
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्॥[20]

एवं वेदविहितकर्तव्यतया पञ्चमहायज्ञा विहिताः गृहस्थेभ्यः। पञ्चमहा-यज्ञविषये प्रथमनिदर्शनं प्राप्यते शतपथे - भूतयज्ञो मनुष्ययज्ञः पितृयज्ञः देवयज्ञो ब्रह्मयज्ञ इति। ततः तेषां नामतः कीर्तनमत्र याज्ञवल्क्योऽपि प्रस्तौति -
बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः
भूतपित्रमरब्रह्ममनुष्याणां महामरवाः ।।[21]
सन्दर्भेऽस्मिन्मनुनोक्तम् - अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥[22]

अत्र अध्यापनशब्देनाध्ययनमपि गृह्यते। तात्पर्यमिदं यद्योऽध्यापकः स अध्यापनं प्रतिदिनं कुर्यात्तस्मात् पूर्वमध्ययनमवश्यमेव कुर्यात्। यथोक्तं तैत्तरीयोपनिषदि 'स्वाध्यायान्मा प्रमदः।" "स्वाध्यायप्रवच-नाभ्यां मा प्रमदितव्यम्" अनेन कर्मणा ब्रह्मयज्ञो भवति। अत्र शास्त्रकाराणामभिप्रायो गृहयते यत्किमपि गुरुभिः श्रुतं शिक्षितं पठितं वा तत्सर्वं लोकशास्त्रज्ञानमन्येभ्यो शिष्येभ्यो दातव्यमिति। अनेनैव ज्ञानपरम्पराऽग्रे गच्छति। परम्परायाः संरक्षणं परं दायित्वमिति मत्वा एतादृशो निर्देशः पूर्वजैः प्रकल्पितः।

पितृयज्ञः तर्पणमिति सामान्यनियमः। किन्तु विस्ताररूपेण यदा सन्दर्भेऽस्मिन्चिन्तयामस्तदा "देवपितृकार्याभ्यां मा प्रमदितव्यम्" इति निर्देशोऽपि अस्माभिः प्राप्यते। अतः तर्पणार्थं पितृपक्षः समायाति। रुढीत्वात् वर्षे एकधैव अयं पक्षः प्रयोगे परिलक्ष्यते । अनेन किं भवति यद्ये पूर्वजा दिवङ्गतास्तेषां कृते एतत्तर्पणविधानं तिलोदक-मित्यादिकम् । साद्धमेव पिण्डदानेन तेषां सन्तुष्टिः प्रकल्पिता वर्तते। अस्य पितृतर्पणस्य इतोऽपि अभिप्रायो ग्रहितुं शक्यते यद् 'मातृ देवो भव' 'पितृ देवो भव' 'आचार्य देवो भव' अनेन वाक्येन प्रतिभाति यत् मातापिता-आचार्यः इति सर्वे मिलित्वा पितृवर्गे एवागच्छन्ति। एते यदि जीविताः सन्ति तर्हि एतेषां सर्वविधसेवाऽपि तर्पणमिति शब्देन ग्रहितुं शक्यते। अतः मातृपित्राचार्यादिनां सेवाऽपि 'पितृयज्ञः' इति निश्चयेन वक्तुं शक्यते। उक्तमपि -
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम्॥[23]

अयं श्लोकः प्रमाणमिति यद्वित्यवृद्धोपसेविनः पितृयज्ञलाभं प्राप्नुवन्ति। अतो नित्यं प्रति श्रेष्ठान् वन्देरन् मनुष्याः।

देवयज्ञसम्बन्धे उच्यते यदयं देवानां प्रसन्नार्थं सम्पाद्यते। देवकृपया सर्वं फलति इति या सर्वमतिश्रद्धा अस्माकं समाजे परम्परया आगच्छति अनया देवपूजनमस्माकं नित्यकर्म । देवकार्यं विना निन्दा भवति इत्यपि निर्देशं निगदति मनुः -

देवतातिथिभृत्यानां पितृणामात्मनश्च यः।
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति॥[24]

देवयज्ञो निश्चयेन विधानीयो नैर्धन्येऽपि। यदा दारिद्र्यादि-दोषादन्यतो वा कारणात्कथिञ्चिदसम्पतौ नातिथ्यादिपूजा घटेत् ततो वैश्वदेवदेवताभ्योऽग्नौ होमः कर्तव्यो यथोक्तम् -

दैवकर्मणि युक्तो हि विभर्तीदं चराचरम् ।[25]

एवं दैवकर्मकुर्वन् चराचरं जगत् धारयति मनुष्यः। दैवकर्मविषयेऽपि निर्दिशति आचार्योऽन्तेवासिनम् - देवतृपितृकार्याभ्यां मा प्रमदितव्यम्।

भूतयज्ञः अत्रबलिः भौतः, बलिः शिष्ट उलूटखलादौ च। भूतादि देवताऽस्येति भौतः। दिवाचारिभ्यो भूतेभ्य इति हि तत्र बलिहरणं भूतशब्देन विहितम्। साहचर्यात्सर्व एष कर्मगणो भूतयज्ञशब्देनोच्यते भूतयज्ञो वस्तुतो मानवजीवनस्य संरक्षणे ये भूतपदार्थाः संलग्ना भवन्ति यथा जलवायुओलूखलवनस्पतयः सन्ति। ऐतेषां पदार्थानां पृथक्-पृथक्देवाः सन्ति तेषां प्रसन्नार्थं विविधकर्मविधानं विहितम्। तस्मिन्सन्दर्भे मनुना प्रोक्तं विस्तारेण -

वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वम्।
आभ्यः कुर्याद्देवताभ्यो ब्राह्मणो होममन्वहम्॥

अर्थात् वैश्वदेवस्य विधिपूर्वकं प्रतिदिनं यज्ञो विधानीयः। ततोक्तम् -

अग्ने सोमस्य चैवादौ तयोश्चैव समस्तयोः।
विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एव च।

भूतयज्ञस्य अनेके देवा ये पदार्थानां स्वामिनस्तेषां आशीर्वादार्थं सन्तुष्ट्यर्थञ्च होमकर्म करणीयमेव। ते के देवाः तस्य निर्देशनमत्र वर्तते। अनेनैव क्रमेण हविर्दातव्यम् । यथोक्तं पुनः -

कुह्वै चैवानुमत्यै च प्रजापतय एव च ।
सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः ।।[26]

पुनः बलेर्विधिनिर्देशनं प्राप्यते तत्रैव -

एवं सम्यग्घविर्हुत्वा सर्वदिक्षुप्रदक्षिणम्।
इन्द्रान्तकाप्पतीन्दुभ्यः सानु गेभ्यो बलिं हरेत्।

ततः कस्य भूतस्य को देव इति निर्देशोऽपि प्राप्यते यथा- द्वारस्य कृते मरुतो देवाः, अतो तेभ्यो द्वारे एव हविर्दद्यात् । जलदेवाय अप्सु हविर्दद्यात्। मुसलोलूखले वनस्पतिभ्यो देवेभ्यो हविर्दद्यादिति नियमः। यथोक्तम् -

मरुद्भ्य इति तु द्वारि क्षिपेदप्स्वद्भ्य इत्यापि ।
वनस्पतिभ्य इत्येवं मुसलोलूखलेहरेत् ॥[27]

एवमेव ग्रहशय्यायाः मस्तकप्रदेशपादप्रदेशाभ्यां श्रीभद्रकालीदेवीभ्यां बलिं दद्यात्।[28]

पुनः आकाशदेवतायै ऊपरि नक्तचरदेवतायै रात्रौ दिनचर देवतायै दिवसे बलिं दद्यात्।

विश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत्।
दिवाचरेभ्यो भूतेभ्यो नक्तञ्चारिभ्य एव च।।[29]
पृष्ठवास्तुनि कुर्वीत बलिं सर्वान्नभूतये ।
पितृभ्यो बलिशेषं तु सर्वं दक्षिणतो हरेत् ।।[30]

गृहस्थधर्मः सर्वोपकारक्षमोन्ये सर्वे जीवाः प्रायो गृहस्थस्योपरि आश्रितो भवन्ति अन्येषां मानवेतराणां जीवानां संरक्षणस्य दायित्वमपि निर्वहति गृहस्थः । एतत्कर्मापि भूतयज्ञः । यथोक्तम् -

शुनां च पतितानां च श्वपचां पापरोगिणाम्।
वयसाञ्च कृमिणाम च शनकैर्निर्वपेद्भुविः॥

एवं भूतपदार्थानां मानवेतरपशुपक्षिजीवानां पालनं पोषणं संरक्षणञ्च महत्त्वपूर्णमनिवार्यदायित्वमस्ति गृहस्थानाम्। एवं कृत्वैव मोक्षपदं लभते । उक्तमपि -

यथा वायुं समाश्रित्य सर्वे जीवन्ति जन्तवः।
तथा गृहस्थमाश्रित्य वर्तन्ते इतराश्रमाः॥[31]

नृयज्ञोऽतिथिपूजनमिति निर्देशेन अतिथिसत्कारः पुण्यकर्म इति। दृष्टान्तो लभ्यते एतस्मिन् सन्दर्भे यत् 'अतिथि देवो भव। कठोपनिषदि अपि यमराजस्य द्वारे नचिकेतानामबालकस्य आतिथ्यराहित्ये दोषविवरणं प्राप्यते अस्माभिः। तथैव कालिदासोऽपि अतिथिसत्कारविषये चेतयति। यथा - आः अतिथि परभाविनि - अतिथिसत्काराहित्येन शकुन्तला शापं प्राप्नोति । सन्दर्भेऽस्मिन् मनुः स्वयं जगाद -

देवतातिथिभृत्यानां पितृणामात्मनश्च यः।
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति॥[32]

तात्पर्यमिदं यत् यो गृहस्थो देवतातिथिमातृपितृवृद्धपितृणाम् अन्नादिभोजनेन सेवया च सन्तुष्टिं न वहति स उच्छ्वसन्नपि न जीवति मृतसदृश एव भवति। एवं पञ्चमहायज्ञानामनुपालनमवश्य-मेवकर्तव्यमिति निर्देशः। पञ्चमहायज्ञविषये मतान्तरमपि दृष्टमिति मनुनोक्तम् । यथा-

अहुतं च हुतं चैव तथा प्रहुतमेव च।
ब्राह्यं हुतं प्रशितं च पञ्चयज्ञान्प्रचक्षते॥

अर्थात् अहुतम्, हुतम्, प्रहुतम्, ब्राह्मयम्, प्राशितमिति पञ्चयज्ञाः ।

अत्र जपः अहुतः, हुतो होमः, प्रहुतो भूतबलिः ब्राह्मयं ब्राह्मणपूजा तथा प्राशितमिति पितृतर्पणम् । अस्य निर्देशः श्लोकेनानेन मनुना प्रकीर्तितः -

"जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः।
ब्राह्मयं हुतं द्विजाग्रयार्चा प्राशितं पितृतर्पणम् ॥[33]

अनेन पञमहायज्ञमार्गेण तदेव फलमाप्नोति यया पूर्वोक्तानां पञ्चमहायज्ञानां फलमस्ति। के पितरः इत्यस्मिन सन्दर्भेऽपि निर्देशः प्राप्यते -

यस्मादुत्पत्तिरेतेषां सर्वेषामप्यशेषतः ।
ये च यैरुपचर्याः स्युर्नियमैस्तान्निबोधत ॥[34]
मनोहिरण्यगर्भस्य ये मरीच्यादयः सुताः।
तेषामृषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः ॥[35]
विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः।
अग्निष्वाताश्च देवानां मारीचा लोकविश्रुताः॥[36]
दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम्।
सुपर्णकिन्नराणां च स्मृता बर्हिषदोऽत्रिजाः।।[37]

सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः।
वैश्यानामाज्यपा नाम शूद्राणां तु सुकालिनः॥[38]
सोमपास्तु कवेः पुत्रा हविष्मन्तोऽङ्गिरः सुताः।
पुलस्त्यस्ययाज्यपा पुत्रा वशिष्ठस्य सुकालिनः॥[39]

एवं क्रमेण मुख्यपितृगणाः सन्ति ततः पुत्रपौत्रादिका अपि पितृसञ्ज्ञकाः यथा -
य एते तु गणा मुख्याः पितॄणां परिकीर्तिताः।
तेषामपीह विज्ञेयं पुत्रपौत्रमनन्तकम्॥[40]

पितॄणामुत्पत्तिक्रमविवरणमपि उल्लिखितमत्र -
ऋषिभ्यः पितरो जाताः पितृभ्यो देवमानवाः।
देवेभ्यस्तु जगत्सर्वं चरं स्थाण्वनुपूर्वशः॥[41]

महायज्ञानां महत्त्वमपरिहार्यत्वं प्रतिपादयन् वदति महर्षिगर्गः -
पञ्चयज्ञांस्तु यो मोहान्न करोति गृहाश्रमी।
तस्य नायं न च परो लोको भवति धर्मः॥

ततश्च महर्षिहारीतोऽपि वदति -
यत्फलं सोमयागेन प्राप्नोति धनवान् द्विजः।
सम्यक् पञ्चमहायज्ञे दरिद्रस्तदवाप्नुयात्।

अतः सर्वैर्गृहस्थैः पञ्चमहायज्ञा अहरहः कर्तव्याः। एवं पञ्चमहायज्ञानां जीवने सर्वत्र आवश्यकताऽस्ति। विधिपूर्वकमेतत्सर्वं पालनीयमस्माभिः। यज्ञानां महत्त्वं प्रायः सर्वप्राचीनैः ऋषिभिः स्वकीयेषु ग्रन्थेषु बहुधा प्रतिपादितमस्ति। यथोक्तं कालिकापुराणे -
यज्ञेषु देवास्तुष्यन्ति यज्ञे सर्वं प्रतिष्ठितम्।
यज्ञेन ध्रियते पृथ्वी यज्ञस्तारयति प्रजाः।
अन्नेन भूता जीवन्ति यज्ञे सर्वं प्रतिष्ठितम्।
पर्जन्यो जायते यज्ञात्सर्वं यज्ञमयं ततः॥[42]

अन्ते महाभारतस्य वाक्येन समाप्यते ।
न हि यज्ञसमं किञ्चित् त्रिषु लोके विद्यते।
तस्माद्यष्टव्यमित्याहुः पुरुषेणानुसूयता॥[43]

सन्दर्भग्रन्थसूची -

1. मत्स्यपुराणम्
2. ऋग्वेदः
3. अथर्ववेदः
4. मनुस्मृतिः
5. पद्मपुराणम्
6. शुक्लयजुर्वेदः
7. शतपथब्राह्मणम्
8. तैत्तिरीयसंहिता
9. अथर्ववेदः
10. यजुर्वेदः
11. महाभारतम्

पाद टिप्पणी -

1 मत्स्यपुराणम्, १४४.४४
2 ऋग्वेदः १.१६४.३५
3 अथर्ववेदः, ९.१०.१४
4 अथर्ववेदः, ११.१.१५
5 अथर्ववेदः, ११.५.४
6 अथर्ववेदः, ४.३४.५
7 अथर्ववेदः, १९.१.१
8 अथर्ववेदः, १०.१०.२४
9 अथर्ववेदः, २०.२५.५
10 मनुस्मृतिः, १.२३
11 पद्मपुराणम् , सृष्टिखण्डः, ३.१२३
12 शुक्लयजुर्वेदः, ३१.९
13 शतपथब्राह्मणम्, ११.१.८.३
14 तैत्तिरीयसंहिता, ३.१०.५
15 अथर्ववेदः, १०.१०.२४
16 यजुर्वेदः, १८.२९
17 यजुर्वेदः, ९.२१
18 यजुर्वेदः, १८.२९
19 मनुस्मृतिः, ३.५७
20 मनुस्मृतिः, ३.५९
21 मनुस्मृतिः, आचाराध्यायः, १०२
22 मनुस्मृतिः, ३.७०
23 मनुस्मृतिः, २.१२१
24 मनुस्मृतिः, ३.६२
25 मनुस्मृतिः, २.६५
26 मनुस्मृतिः, ३.७६
27 मनुस्मृतिः, ३.७०
28 मनुस्मृतिः, ३.७९
29 मनुस्मृतिः, ३.८०
30 मनुस्मृतिः, ३.८१
31 मनुस्मृतिः, ३.७७
32 मनुस्मृतिः, ३.६२
33 मनुस्मृतिः, ३.६४
34 मनुस्मृतिः, ३.१८३
35 मनुस्मृतिः, ३.१८४
36 मनुस्मृतिः, ३.१८५
37 मनुस्मृतिः, ३.१८६
38 मनुस्मृतिः, ३.१८७
39 मनुस्मृतिः, ३.१८८
40 मनुस्मृतिः, ३.१९०
41 मनुस्मृतिः, ३.१९१
42 मनुस्मृतिः, ३.२.७-८
43 शान्तिपर्व, ६१.५३